कारे चिह्ने, ३रोगभेदे च अमरः "कृष्णानि तिलमात्राणि नीरुजानि समानि च। वातपित्तकफोद्रेकात् तान् विद्यात् तिलकालकान्" सुश्रु० ।

**तिलकाश्रय** पु० ६त०। ललाटे शब्दार्थक० ।

**तिलकिट्ट** न० ६त०। तिलपिण्याके "तिलकिट्टं तु रूक्षं स्यात् ग्लपनं दृष्टिदोषकृत्। विष्टम्भकारणं तद्धि भिषग्भिः परिकीर्त्तितम्" भावप्र० ।

**तिलकिन्** त्रि० तिलक+अस्त्यर्थे इनि। तिलकधारिणि "शिखी तिलकी कर्म्म कुर्य्यात्" स्मृतिनिबन्धे कल्पश्रुतिः।

**तिलचित्रपत्रक** पु० तिलस्येव चित्रं पत्रमस्य कप्। तैलकन्दे वृक्षभेदे राजनि० ।

**तिलचूर्ण** न० ६त०। चूर्णीकृततिले (तिलकुटा) १खाद्यभेदे। २तिलकल्के च राजनि० ।

**तिलतण्डुलक** पु० तिलस्य तण्डुल इव कायति कै—क। १आलिङ्गने शब्दमा० आलिङ्गनस्य तिलतण्डुलवत् संश्लेषयुक्तत्वात् तथात्वम्। ६त०। २तिलस्य तण्डुले निस्तुषतिले पु० (माजातिल)।

**तिलतेजा** स्त्री तिल इव तेजयति चुरा० तिज—अच्। लताभेदे "कफजे तिलतेजाह्वा दन्तीखर्जिकचित्रकाः" सुश्रु०

**तिलन्तुद** त्रि० तिलं तुदति तुद—खश् मुम्। तैलिके तिलपीड़के। [दशीभेदे व्रतशब्दे दृश्यम्।

**तिलद्वादशी** स्त्री तिलभोजनादिनियमयुक्ता द्वादशी। द्वा-

**तिलधेनु** स्त्री० तिलनिर्म्मिता धेनुः शा०त०। विधानेन दानार्थं तिलकृतायां धेनौ। तद्विधानं यथा।

"विधानं तिलधेनोस्त्वं ब्रूहि शीघ्रं द्विजोत्तम!। मुनिः प्राह विधानं यत् तच्छृणुष्व नराधिप!। षोड़शाढ़ककैर्धेनुश्चतुर्भिर्वत्सको भवेत्। इक्षुदण्डमयाः पादादन्ताः पुष्पमया शुभाः। नासा गन्धमयी तस्या जिह्वा गुड़मयी तथा। स्थितां कृष्णाजिने धेनुं वस्त्रोभिर्वाषितां शुभाम्। स्रग्भिश्च वासितां कृत्वा पञ्चरत्नसमन्विताम्। सर्वौषधिसमायुक्तां मन्त्रपूतान्तु दापयेत्। अन्नं मे जायतां सद्यः पानं सप्त रसास्तथा। कामं सम्पादयास्माकं तिलधेनुमुपार्ज्जिताम्। गृह्णामि त्वां देवि! भक्त्या कुटुम्बार्थे विशेषतः। कुटुम्बकामं कुरुतां तिलधेनो! नमोऽस्तु ते। एवंविधां नरोदत्त्वा तिलधेनुं नृपोत्तम!। सर्वकामसमाप्तिं च कुरुते नात्र संशयः" प०पु० सृ०ख०।

**तिलपर्ण** पु० तिलस्येव पर्णमस्य। १श्रीवेष्टे वृक्षे राजनि०। २चन्दने न० राजनि०। ६त०। तिलवृक्षस्य ३पत्रे न०।

**तिलपर्णी** स्त्री तिलस्येव पर्णान्यस्याः ङीप्। १रक्तचन्दने। अमरः २नदीभेदे स्त्री शब्दार्थचि०। तिलपर्णीनदी आकरत्वेनास्त्यस्या अच् गौरा० ङीष्। ३सिह्लके गन्धद्रव्यभेदे स्त्री हेमच०। स्वार्थे क। तिलपर्णिका रक्तचन्दने हेमच०।

**तिलपिञ्ज** पु० पु० निष्फलस्तिलः तिल+पिञ्ज। निष्फलतिले "वन्ध्योऽर्ज्जुनकाण्डस्य यवस्य ते पलाल्या तिलस्य तिलपिञ्ज्या" अथ० २।८।३।

**तिलपुष्पक** पु० तिलस्येव पुष्पमस्य कप्। विभीतकवृक्षे पारस्करनै०। न०। ६त०। २तिलस्य पुष्पे च तत्सादृश्यात् ३नासिकायाम् तन्त्रसा०।

"पद्मं दृष्ट्वा तथा बिम्बं खञ्जनं शिखरन्तथा। चामरं रविबिम्बञ्च तिलपुष्पं सरोरुहम्। त्रिशूलं वीक्ष्य जप्त्वा च शतशः शुद्धभावतः। "पद्मं मुखं बिम्बमधरं खञ्जनञ्चक्षुः शिखरं मस्तकं चामरं केशं रविबिम्बं सिन्दूरं तिलपुष्पं नासिकां सरोरुहम् नाभिं त्रिशूलं त्रिवलीम्"। तन्त्रसारः।

**तिलपेज** पु० निष्फलस्तिलः तिल+पेज। निष्फले तिले अम०।

**तिलभार** पु० देशभेदे "तिलभाराः समीराश्च मधुमत्ताः सुकन्दकाः। भा० भी० ६३ अ०।

**तिलमय** त्रि० तिलस्य विकारः तिल+असंज्ञायां मयट्। तिलविकारे संज्ञायांतु अण्। तैलमित्येव।

**तिलमयूर** पुंस्त्री० तिलपुष्पचिह्नितः मयूरः शा० त०। (तिलेमयूर) मयूरभेदे त्रिका०। स्त्रियां जातित्वात् ङीष्।

**तिलरस** पु० ६त०। तिलतैले।

**तिलशस्** अव्य० तिलं तिलं तत्परिमितं करोतीति मानार्थत्वात् वीप्सायां कारकार्थे शस्। तिलं तिलं कृत्वेत्येवमाद्यर्थे। "तिलशस्तद्रथं चक्रे साश्वध्वजपताकिनम्" हरिवं० १८६ अ०।

**तिलशैल** पु० दानार्थे कल्पिते दशसु अचलेषु अचलभेदे। तिलाचलादयोऽप्यत्र। तिलाचलश्च द्विविधः तिलमयप्रधानमेरुः, धान्यशैलस्य पश्चात् कल्पितः तिलमयविष्कम्भगिरिश्च। तत्र मेरुरूपतिलशैलदानविधिर्यथा

"प्रथमो धान्यशैलः स्यात् द्वितीयो लवणाचलः। गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः। पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः। सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः। राजतो नवमस्तद्वद्दशमः शर्कराचलः। वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः। अयने विषुवे पुण्ये